# श्री कामेश्वर्यष्टकं

कामेश्वरि! नमस्तुभ्यं कालशक्ति स्वरूपिणि ।
कात्यायिनि! महादेवि! कैटभासुरामर्दिनि ॥ 1

कामेश्वरि! नमस्तुभ्यं ब्रह्मविद्या स्वरूपिणि ।
कामेश्वरि! जगन्मातः! सर्वमंगळदायिनि ॥ 2

कामेश्वरि! नमस्तुभ्यं सर्वकामप्रदायिनि ।
कामेश्वरि मुखालोक पूर्ण संतोषशालिनि ॥ 3

कामेश्वरि! नमस्तुभ्यं सच्चिदानंद विग्रहे ।
कामेश्वरि नमस्तुभ्यं काम्यकाम्य प्रदायिनि ॥ 4

कामेश्वरि! नमस्तुभ्यं सदाशिव कुटुंबिनि ।
सर्वसंपत् प्रदेबाले कुलसंकेतपालिनि ॥ 5

कामेश्वरि! नमस्तुभ्यं सर्वलोकनिवासिनि ।
कामेश्वरप्रिये! देवि! कामितार्थ प्रदायिनि ॥ 6

कामेश्वरि! नमस्तुभ्यं सर्वलोकनिवासिनि ।
सर्वयंत्रात्मिके! देवि! सर्वमंत्रस्वरूपिणि ॥ 7

© 2022 Vedam Nadam

कामेश्वर्यष्टकं इदं यः पठेर्भद्ध मानसः ।
सयाति ब्राह्मणलोकं यावदाचंद्र तारकम् ॥ 8

॥ इति श्री कामेश्वर्यष्टकं संपूर्णम् ॥